- Title – शब्द रत्न
- Accession No – Title –
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning –
- End –
- Colophon-
- Illustrations -
- Source -
- Subject - व्याकरण
- Revisor -
- Author - जगदीश आचार्य

1. Remarks- अपूर्ण

२

जय

श्रीमतेरामानुजायनमः आप्तोक्तःशाब्दप्रमाणं प्रकृतवाक्यार्थगोचरयथार्थज्ञानवावानाप्तः (1)
पदज्ञानंकरणं पदैःपदार्थोपस्थितिर्व्यापारः आकांक्षायोग्यतासत्तितात्पर्यज्ञानानिसहका
रीणि फलंशाब्दबोधः स्वरूपयोग्यत्वेसतिअजनितान्वयबोधजनकत्वमाकांक्षा तेनघ
टःकर्मत्वंआनयनंकृतिरित्यत्रनान्वयबोधः स्वरूपायोग्यत्वात् अयमेतिपु त्रोराज्ञःपुरुषो
ऽपसार्यतामित्यत्र राज्ञःपुरुषइतिनान्वयबोधः पुत्रेणजनितान्वयबोधकत्वात् बाधकप्र
मा विरहोयोग्यता तेनवह्निनासिंचतीत्यत्रनान्वयबोधः अयोग्यत्वात् अव्यवधाने
नान्वयप्रतियोग्युपस्थितिरासत्तिः तेनगिरिर्भुक्तंवह्निमान्देवदत्तेनेत्यादौनान्वयबोधः
तत्तत्प्रतीतीच्छयोच्चरितत्वंतात्पर्यम् तेनभोजनप्रकरणेसैंधवमानयेत्युक्तेऽश्वा
न्वयबोधोनभवति वृत्याविनाशब्देननान्वयबोधोजन्यते वृत्तिर्द्विविधाशक्तिर्लक्ष
णाच शक्तिर्घटादिपदस्यघटादौ लक्षणायथागंगायांघोषःप्रतिवसतीत्यत्रगंगापदा णा

२

नत्वम् आख्यातस्य कृतिः तत्संबंधः संसर्गमर्य्यादयालभ्यः यत्र कर्त्तरि कृतेर्बोधस्तत्राख्यातस्य व्यापारादौल
क्षणा यथा रथो गच्छतीत्यत्र गमनजनकवर्त्तमानव्यापारवान् रथः दधिपश्येत्यादौ द्वितीयालोपस्यले
दधिशब्द एव अजहत्स्वार्थलक्षणया दधिकर्मत्वमुपस्थापयति एकवचनाद्युपस्थितमेकत्वादि सर्वत्र
प्रथमान्तपदोपस्थापिते अन्वेति देवदत्तेन गम्यते ग्राम इत्यत्र देवदत्तवृत्तिकृतिजन्यगमनजन्यफल
शालीग्राम इत्यर्थः वृत्तित्वं संसर्गवललभ्यम् तृतीयायाश्च कृतिः जन्यत्वं गमनं धातोरर्थः जन्यत्वं सं संसर्गः
फलमात्मने पदार्थः शालित्वं संसर्गः ५ सर्गः भावप्रत्यये तु देवदत्तेन सुप्यत इत्यत्र देवदत्तवृत्तिकृतिजन्यः स्वाप इत्यर्थः भावप्रत्ययस्य लेफ
लाभावादात्मनेपदार्थो न भासते फलं कर्मात्मनेपदार्थः शालित्वं संसर्गः भविष्यत्वं लृटोर्थः तच्चाविद्य
मानप्रागभावप्रतियोग्युत्पत्तिकत्वं तेन आगमिष्यतीत्यत्र विद्यमानप्रागभावप्रतियोग्युत्पत्तिकागम
नानुकूलकृतिमानित्यर्थः लुटोर्थः अनद्यतनत्वमपि लङोर्थः उत्पत्तिर्भूतत्वं च भूतत्वं अतीतत्वं ॥

र्थे प्रवाहे घोषवासान्वयानुपपत्त्या गंगापदस्य तीरे लक्षणा कल्प्यते तथा च त्योयास्यि तेती
रे घोषः प्रतिवसतीत्यन्वयबोधो भवति गौणीवृत्तिरपि लक्षणैव यथाग्निर्माणवको गौ
र्वाहीकः अत्र लक्षणयाग्न्यादिसादृश्यं प्रतीयते शक्तंपदं तच्चतुर्विधं यौगिकं रूढं
योगरूढम् यौगिकरूढम् चेति आद्यं यथा पाचकादिपदम् योगार्थ्यैपाकजनिकर्तरि श
क्तम् द्वितीयं यथा विप्रादिपदं रूढ्या ब्राह्मणवाचकम् तृतीयं पंकजादिपदं योगरू
ढ्या पंकजनिकर्तृत्वेन पद्मत्वेन पद्मवाचकम् चतुर्थं यथा उद्भिदादिपदं खनित्र
वाचकम् लक्षणा द्विधा जहत्स्वार्था अजहत्स्वार्था च आद्या यथा गंगायां घोष इत्या
दौ द्वितीया त वै छत्रिणो यांति इत्यादौ अत्र छत्रिणाक्तादित्तस्य गमनान्वयः अ
पश्चाद्बोधप्रक्रिया देवदत्तो ग्रामं गच्छतीत्यत्र ग्रामकर्मकगमनजनक वर्तमान

कृतिमानित्यान्वयबोधः द्वि
तीयार्थः कर्मत्वं धातोर्गमनं
तज्जनकत्वं संसर्गमर्यादया ल
भ्यम् लटो वर्तमा[illegible]

ग

पा

ष्टीप्रवाचकत्वंपदः तदानींतनत्वं स्थूलकालमादाय पूर्वकालीनत्वं कर्त्ता च क्त्वाप्रत्ययार्थः पूर्वत्वं च
सान्निहितक्रियापेक्षया बोध्यम् तत्तत्कालीनत्वं च तत्प्रागभावकालवृत्तित्वम् तदुत्पत्तिकालीनध्वं
सप्रतियोगिकालवृत्तित्वं वा तेन भुक्त्वा व्रजतीत्यत्र गमनप्रागभावावच्छिन्नकालवृत्तिभोज
नकर्त्रभिन्नो व्रजतीत्यर्थः समानविभक्तिकत्वकृतोऽभेदेन धर्मिवाचकत्वात् अव्ययत्वेन
क्त्वापरविभक्तिलोपात् कालस्तात्पर्यवशाद्व्यवहिताव्यवहितसाधारणो बोध्यः तेन पूर्व
स्मिन्नब्दे गत्वा अस्मिन्नब्दे समागत इत्यत्र तादृशप्रयोगावगमः इच्छावान् तुमुनोऽर्थः
भोक्तुं व्रजतीत्यस्य भोजनेच्छावान् व्रजतीत्यर्थः भोक्तुमिच्छतीत्यत्र कर्तृलक्षणा भोजन
कर्तारमात्मानमिच्छतीत्यर्थः सविशेषणे हीति न्यायात् विशेषणाकृताविच्छान्वयः धात्व
र्थकर्त्ता कर्तृ शतृशानचोः धात्वर्थजन्यफलवान् कर्म शानचोऽर्थः शत्रादीनां कर्त्ता

सविशेषणे हि
विधिनिषेधौ
विशेषणमुपसं
क्रामतः सति विशे
ष्ये बाधे ॥ यथाल्व
र्गी छत्रीः २

तच्चोत्पन्नावन्वेति तथा च विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वं लब्धम् । लिटोपि परोक्षत्वमतीतत्वं चार्थः
विधिर्लिङोर्थः कृतिसाध्यत्वे सति बलवदनिष्टाजनकेष्टसाधनत्वम् स्वर्गकामो यजेदित्यादौ कृति
साध्यबलवदनिष्टाजनकेष्टसाधनयागकः स्वर्गकामस्त्यर्थः आशीर्लिङ्लोटोर्थः वक्तुरिच्छावि
षयत्वं तेन घटमानयेत्यत्र घटकर्मकमदिच्छाविषयानयनानुकूलकृतिमांस्त्वमित्यन्वय
बोधः व्याप्याक्रियाव्यापकाक्रियायाआपादनं लृङोर्थः तात्पर्यवशात् क्वाचित्कृतत्वं क्वाचित्प्र
विष्यत्वं लृङा बोध्यते सनः कर्तुरिच्छार्थः सन्नुत्तराख्यातस्याश्रयत्वे लक्षणा साविषयकार्थप्र
कृतिकाख्यातस्याश्रयत्वे लक्षणा घटं जानातीत्यादौ लकारत्वात् यङोर्थः पौनःपुन्यं तत्त्वं चत
दानींतनप्रकृत्यर्थसजातीयक्रियान्तरध्वंसकालीनत्वे सति वर्तमानादिकृतिविषयत्वम्
पापच्यते इत्यादौ तादृशकालीनत्वं यङा प्रत्याय्यते आख्यातस्य चरमदलवाचकत्वात् नवि

विषयितिती न्यत्र के... पातानुकूलव्यापारविषयकेच्छाश्रयो देवदत्तः

त्वंश्रीमानयः ... च्छाविषयभवनानुकूलव्यापाराश्रयः

वाच्यः एवं कर्तृकर्मकृत्तां तेन तेन रूपेण कर्त्ता कर्म वाच्यम् भावकृत्त ल्युट् घञादीनां योगसा॰ प्र
धुतामात्रम् धात्वर्थातिरिक्तस्य भावकृत्तौ ऽनुपस्थानात् इति न नु नीलं घटमानयेत्यादौ द्वितीया
द्वय श्रवणात् कर्मद्वयबोधापत्तिः न तु विशिष्टस्य कर्मत्वमिति चेत् अत्र विशेषणविभक्तिः पदसाधु
त्वाय अथवा विशेषणविभक्तेरभेदोऽर्थः अत्रापं विशेषः द्वितीयप त्तेवाक्यसमासयोः पर्याय
तानघटते वाक्ये नीलं घटमित्यादावभेदस्य पदार्थत्वेन प्रकारत्वात् न संसर्गत्वम् नीलघटमि
त्यादौ कर्मधारये लक्षणया आश्वीकारेण भेदस्यापदार्थत्वेन संसर्गत्वात् तथा च वाक्यसमा
सयोः पर्यायतानुरोधेन षष्ठीसमासे राजपुरुष इत्यादौ षष्ठ्यर्थसंबंध लक्षणान घटते संबंध
स्य संसर्गपदार्थत्वात् वस्तुतस्तु विरुद्धविभक्त्यनवरुद्धस्याभेदबोधकत्वव्युत्पत्तेः मुख्यार्थराजाभेद
स्य बाधेन राजपदस्य राजसंबंधिनि लक्षणा एवं बहुव्रीहौ चरमपदस्यान्यपदार्थे लक्षणा एवं न

विशेष्यतावच्छेदकसमानाधिकरण्यात्यंताभावप्रतियोगिकत्वविशिष्टनील
भवनकर्तृतादात्म्याभावाभाववत्सरोजमित्यर्थः २

न्यर्थोऽभावः अघटं भूतलमित्यादौ घटभिन्ने लक्षणा नकलंजं भक्षयेदित्यादौ बलवदनिष्टाजनकत्वे
लक्षणा ॥ क्रियासंगतस्यैवकारस्यात्यंतायोगव्यवच्छेदोऽर्थः यथा नीलं सरोजं भवत्येव । विशेषणसंगत
पां ३ (तादात्म्याभाव भाववत्त्वं ३ स्यायोगव्यवच्छेदः यथा शंखः पांडुर एव विशेष्यसंगतस्यान्ययोगव्यवच्छेदः यथा पार्थ एव धनु(पार्थस्य तादात्म्या वानुत्कर्ष धरः त्यर्थः
श्रा र्धरः एवं दर्दिं सर्वत्र बोध्यं ॥ इति श्री जगदीशभट्टाचार्यकृतिषु शाब्दत्वंऽः समाप्तः ॥ ॥
॥ ॥ श्रीमते रामानुजाय नमः रमापतये नमः ॥ ॥

8